aglasem.com

FOR MP CLASS 12 PREPARATION

MP Board Class 12 Sample Paper 2027 Sanskrit

EXAM	YEAR	TYPE	SUBJECT
MP Class 12	2027	Sample Paper	Sanskrit

केवल अभ्यास हेतु नमूना प्रश्न पत्र

हायर सेकेण्ड्री परीक्षा 2026-2027

विषय - संस्कृत

कक्षा - 12 वीं

कुल प्रश्न	कुल मुद्रित पृष्ठ	समय	पूर्णांक
23	08	03:00	80

निर्देशाः - 1. सर्वे प्रश्नाः अनिवार्याः सन्ति।

2. प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

3. सर्वेषां प्रश्नानां उत्तराणि संस्कृत भाषायां देयानि।

प्रश्न 1. उचितं विकल्पं चित्वा लिखत - **1 x 6 = 6**

1. "दधात्युषसि" पदस्य सन्धि विच्छेदः अस्ति -

(अ) दधाते + षसि (ब) दधात्यु + षसि

(स) दधात्युष + सि (द) दधाति + उषसि

2 . "आथर्वणश्च" पदे सन्धिः अस्ति -

(अ) विसर्ग सन्धिः (ब) गुण सन्धिः

(स) यण् सन्धिः (द) व्यञ्जन सन्धिः

3 . "कठोरभाषणैः" पदस्य विग्रहः अस्ति -

(अ) कठोरस्य भाषणैः (ब) कठोराय भाषणैः

(स) कठोरैः भाषणैः (द) कठोर भाषणैः

4 . ताभ्यः + बलिम् अनयोः सन्धिपदं भविष्यति -

(अ) ताबलिम् (ब) ताभ्योबलिम्

(स) तस्यबलिम् (द) ताभ्यबलिम्

5. 'माता च पिता च ' = समस्तपदं भवति -

(अ) पितरौ (ब) मातपिता

(स) मातपितुः (द) पितामाता

6 . 'नराधमान्' पदे समासः अस्ति -

(अ) अव्ययीभाव समासः (ब) द्विगु समासः

(स) द्वन्द्व समासः (द) तत्पुरुष समासः

प्रश्न- 2. प्रदत्त शब्दैः रिक्तस्थानपूर्तिं कुरुत - **1x 7 = 7**

1. 'अभवत्' इत्यस्मिन् पदे .... लकारः अस्ति। (लङ् /लोट्)
2. 'चर' इत्यस्मिन् पदे .... पुरुषः अस्ति। (प्रथम/मध्यम)
3. 'पठ्' धातोः लृट् लकारस्य उत्तमपुरुषस्य बहुवचनस्य .... रूपं अस्ति। (पठिष्यावः/पठिष्यामः)
4. 'गच्छति' इति रूपम् .... अस्ति। (एकवचनस्य/बहुवचनस्य)
5. "अभिधीयताम्' इत्यस्मिन् पदे .... उपसर्गः अस्ति। (अभी/अभि)
6. "निशम्य" इत्यस्मिन् पदे .... उपसर्गः अस्ति। (नि/निस्)
7. 'वि' उपसर्ग युक्तं .... पदम् अस्ति। (वृद्धावस्था/व्यचिन्तयत्)

प्रश्न - 3. शुद्ध वाक्यानां समक्षं "आम्" अशुद्ध वाक्यानां समक्षं "न" इति लिखत - **1x 6 = 6**

1. "प्रतापी तनयः" अनयोः पदयोः विशेषण पदं 'तनयः' अस्ति।
2. "प्रभूतम् धनम्" अनयोः पदयोः विशेष्य पदं 'धनम्' अस्ति।
3. "एकम् लोकम्" अनयोः पदयोः विशेषण पदं 'एकम्' अस्ति।
4. "दिवङ्गते राजनि" अनयोः पदयोः विशेष्य पदं 'दिवङ्गते' अस्ति।
5. "अपादान" योगे चतुर्थी विभक्तिः भवति।
6. "अधिकरण" कारके सप्तमी विभक्तिः भवति।

प्रश्न - 4. युग्ममेलनं कुरुत - **1x 6 = 6**

(अ)		**(ब)**
(i) प्रमदितव्यम्	-	तुमुन् प्रत्ययः
(ii) विसर्जितः	-	पुनः अव्ययम् अस्ति
(iii) उत्स्रष्टुम्	-	क्त प्रत्ययः
(iv) यथायोग्य	-	तव्यत् प्रत्ययः
(v) श्रुतिः पुनः द्विविधा	-	मा अव्ययम् अस्ति
(vi) मा शुचः	-	यथा अव्ययम् अस्ति

प्रश्न - 5. एकवाक्येन उत्तरं लिखत - **1x 7 = 7**

1. सनयः तनयः कः आसीत् ?
2. दैवी संपद् कस्मै मता ?
3. कः प्रियः अपि त्याज्यः ?
4. 'सत्यम्' पदस्य विलोम पदं लिखत ?
5. 'मौनम्' पदस्य विलोम पदं लिखत ?
6. 'शर्वरी' पदस्य पर्याय पदं लिखत ?
7. 'वसुमती' पदस्य पर्याय पदं लिखत ?

अधोलिखित प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत -

प्रश्न 6. वाङ्मयस्य उभौ भेदौ लिखत ? **2**

प्रश्न 7. जगतः क्षयाय के प्रभवन्ति ? **2**

प्रश्न 8. रविः रसं किमर्थम् आदत्ते ? **2**

प्रश्न 9. रामेण त्रीणि पातकानि कानि उक्तानि ? **2**

प्रश्न 10. रात्रौ के के प्रविशन्ति ? **2**

प्रश्न - 11. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् सुभाषितमेकं (एकं) लिखत। **2**

प्रश्न - 12. रेखाङ्कितपद्माधृत्य प्रश्ननिर्माणं कुरुत - **1x 2 = 2**

1. अस्त्रधारा **शतधा** अभवत्।
2. **शब्दानाम्** अन्वाख्यानं व्याकरणम् ।

प्रश्न - 13 . अधोलिखितानि वाक्यानि कः कं प्रति कथयति - **1x 2 = 2**

1. नारी जीवनयात्रायां कमपि सहचरमपेक्षते। कः - कं प्रति
2. नवनृपतिविमर्शे नास्ति शङ्का प्रजानाम्। कः - कं प्रति

प्रश्न - 14. संस्कृतभाषायाः प्रथमः उपन्यासः कः ? लेखकस्य नाम लिखत। **2**

प्रश्न - 15. आदिकाव्यं किम् ? कवेः नाम लिखत। **2**

प्रश्न - 16. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - **3**

(क) पुरा धाराराज्ये सिन्धुल-संज्ञो राजा चिरं प्रजाः पर्यपालयत्। तस्य वार्धक्ये भोज इति पुत्रः समजनि। सः यदा पञ्चवार्षिकस्तदा पिता ह्यात्मनो जरां ज्ञात्वा मुख्यामात्यानाहूयानुजं मुञ्जं महाबलमालोक्य पुत्रं च बालं संवीक्ष्य विचारयामास - यद्यहं राज्यलक्ष्मीभारधारणसमर्थं सहोदरमपहाय राज्यं पुत्राय प्रयच्छामि, तदा लोकापवादः । अथ वा बालं मे पुत्रं मुञ्जो राज्यलोभाद्विषादिना मारयिष्यति तदा दत्तमपि राज्यं वृथा । पुत्रहानिर्वंशोच्छेदश्च इति विचार्य राज्यं मुञ्जाय दत्त्वा तदुत्सङ्गे भोजमात्मानं मुमोच। ततः क्रमाद् राजनि दिवङ्गते सम्प्राप्तराज्य-सम्पत्तिर्मुञ्जो मुख्यामात्यं बुद्धिसागरनामानं व्यापारमुद्रया दूरीकृत्य तत्पदेऽन्यं नियोजयामास । अथ कदाचन सभायां ज्योतिः शास्त्रपारङ्गतः कश्चन ब्राह्मणः समागम्य राजानम् आह देव! लोका: मां सर्वज्ञं कथयन्ति ।

प्रश्नाः - 1. मुञ्जः मुख्यामात्यं कया दूरीकृतवान् ?

2. सिन्धुलः किं विचार्य राज्यं मुञ्जाय दत्तवान् ?

3. मुञ्जस्य सभायां कीदृशः ब्राह्मणः समागतः ?

अथवा

(ख) वत्सराजस्य इदं वचनमाकर्ण्य कुपितो राजा प्राह त्वं मम सेवकोऽसि, मया यत्कथ्यते त्वया तद् विधेयम्। पुनः वत्सराजः राजाज्ञा पालनीयैवेति मत्वा तूष्णीं बभूव। अनन्तरम् अनिच्छन्नपि वत्सराजः भोजं रथे निवेश्य रात्रौ वनं नीतवान्। तत्र आत्मनो वधयोजनां ज्ञात्वा भोजः किमपि वत्सराजं कथितवान्। तद्वचनैः वैराग्यमापन्नो वत्सराजः तं न हतवान्, अपितु गृहमागत्य भोजं गृहाभ्यन्तरे भूमौ निक्षिप्य ररक्ष। पुनः कृत्रिमरूपेण भोजस्य मस्तकं कारयित्वा राजभवनं गत्वा वत्सराजो राजानं प्राह श्रीमता यदादिष्टं तत्साधितमिति। ततो राजा भोजवधं ज्ञात्वा तं पृष्टवान् वत्सराज! खड्गप्रहारसमये तेन किमुक्तम् ? वत्सराजेन च राज्ञे भोजस्य अन्तिमसन्देशरूपेण तत्प्रदत्तः श्लोकः समर्पित:-

मान्धाता च महीपतिः कृतयुगालङ्कारभूतो गतः

सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः ॥

अन्ये वापि युधिष्ठिरप्रभृतयो याता दिवं भूपते !

नैकेनापि समं गता वसुमती नूनं त्वया यास्यति।।

प्रश्नाः - 1. कस्य वधः कदापि हिताय न भवति ?

2. वत्सराजः भोजं कुत्र निक्षिप्य ररक्ष ?

3. महोदधौ सेतुः केन रचितः ?

प्रश्न -17 अधोलिखितयोः पद्यांशयोः पठित्वा पद्यांशमेकस्य प्रश्नानाम् उत्तराणि संस्कृत भाषायां लिखत - **3**

(क) गुणी गुणं वेत्ति न वेत्ति निर्गुणः

बली बलं वेत्ति न वेत्ति निर्बलः।

पिको वसन्तस्य गुणं न वायसः

करी च सिंहस्य बलं न मूषकः।।

प्रश्नाः - 1. सिंहस्य बलं कः न वेत्ति ?

2. निर्गुणः कं न वेत्ति ?

3. वसन्तस्य गुणं कः वेत्ति ?

अथवा

(ख) स्वायत्तमेकान्तगुणं विधात्रा

विनिर्मितं छादनमज्ञतायाः।

विशेषतः सर्वविदां समाजे

विभूषणं मौनमपण्डितानाम्।।

प्रश्नाः - 1. मौनं कस्याः छादनं करोति ?

2. केषां समाजे अपण्डितानां मौनं विभूषणम् ?

3. स्वायत्तमेकान्तगुणं मौनं केन विनिर्मितम् ?

प्रश्न-18 अधोलिखितयोः नाट्यांशयोः पठित्वा नाट्यांशमेकस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत- **3**

(क) ऋतध्वजः - अहो ! शोभनं गन्धर्वराजविश्वावसोः राजोद्यानम्। आम्रमञ्जरीणां परां शोभां

दृष्ट्वा कोकिलानां च मधुरवचांसि श्रुत्वा कस्य यूनो हृदयं सहसा उत्कण्ठितं न भविष्यति ?

वामपार्श्वे रमणीनामालाप इव श्रूयते। अत्रैव स्थित्वा श्रोष्यामि।

कुण्डला - सखि मदालसे ! त्वं तु केवलं विद्याध्ययने एव रता , कियन्तं कालं यावत्

ब्रह्मचर्यव्रतं धारयिष्यसि ?

मदालसा - ज्ञानोदधिस्तु अनन्तपारो गभीरश्च। मया सागरतटे स्थित्वा कतिपयबिन्दव

एव प्राप्ता अद्यावधि।

कुण्डला - विनयशीले ! विद्या ददाति विनयम् , अत एव एवं भणसि।

कुलगुरु तुम्बरूमहाभागैस्तु गन्धर्वराजाय अन्यदेव सूचितम्।

मदालसा - किं श्रुतं त्वया यद् गुरुवर्यैः माम् अधिकृत्य पित्रे कथितम् ?

प्रश्नाः - 1. विद्याध्ययने एव का रता आसीत् ?

2. ज्ञानोदधि कीदृशः अस्ति ?

3. विद्या किं ददाति ?

अथवा

(ख) कुण्डला - गृहस्थाश्रमं प्रविश्य स्वशिशूनां चरित्रनिर्माणं मातुराधीनम्। तत्र का विचारणा ?

मदालसा - यथाहं पश्यामि पुरुषः भार्यायां स्वाधिपत्यं स्थापयति। द्रौपदीं स्वीयां सम्पत्तिं मन्यमानः युधिष्ठिरः तां द्यूते हारितवान्, यथा सा निर्जीवं वस्तु आसीत्।

कुण्डला - निर्जीवं तु नासीत्, परं युधिष्ठिरस्य एषा एव चिन्तनसरणिः आसीत् इति प्रतीयते।

मदालसा - हरिश्चन्द्रः स्वपत्नीं शैव्यां , पुत्रं रोहितं च जनसंकुले आपणे विक्रीतवान्। नास्ति मे मनोरथः ईदृशं पत्नीपदमङ्गीकर्तुम्।

कुण्डला - कटुसत्यं खल्वेतत्। परं सखि !अस्मिन् संसारे विभिन्नप्रकृतिकाः पुरुषाः वसन्ति। स्वप्रकृत्यनुकूलः वरः अपि प्राप्यते।

त्वं तु नवनवोन्मेषशालिन्या प्रतिभया विहितैः नूतनैः प्रयोगैः अस्मान् सर्वान् विस्मापयसि। गृहस्थाश्रमोऽपि एका प्रयोगशाला , यस्यां त्वं स्वज्ञानविज्ञानयोः प्रयोगं कर्तुं शक्ष्यसि।

,मदालसा - कुण्डले ! दुर्लभो जनः ईदृशः , यः गृहस्थप्रयोगशालायां स्वपत्न्यै स्वतन्त्रतां दद्यात्।

प्रश्नाः - 1. संसारे कीदृशाः पुरुषाः वसन्ति ?

2. हरिश्चन्द्रः स्वपत्नीं पुत्रं च कुत्र विक्रीतवान् ?

3. गृहस्थाश्रमं प्रविश्य स्वशिशूनां चरित्रनिर्माणं कस्याः अधीनम् ?

प्रश्न 19 - रिक्तस्थान पूर्तिं कुरुत (कोऽपि त्रयः) **3**

1. शास्त्रं द्विधा- .... .पौरुषेयं च।
2. अभयं .... र्ज्ञानयोगव्यवस्थितिः।
3. यान्यनवद्यानि ....तानि सेवितव्यानि।
4. एकेन अपि ....साधुना।

प्रश्न 20. अधोलिखितम् अपठितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत| (कोऽपि चत्वारः) **4**

संसारेऽस्मिन् जननी अस्मभ्यं यानि यानि सुखानि प्रयच्छति, जन्मभूमिश्च तथैव सौविध्यानि ददाति।

जन्मदात्री माता जन्मभूमिश्च स्वर्गाद् अपि श्रेष्ठा वरिष्ठा च वर्तते। माता कुमाता कदापि न भवति। सा जन्मन प्रभृति अतीव निश्छलप्रेम्णा पुत्रं पुत्रीं च लालयति, पालयति, स्वदुग्धं पाययित्वा शिशुं वर्धयति स्वयं च महत्कष्टानि अनुभूय तं सुखयति, महद्भयाच्च रक्षति।

शीततौं रात्रिकालेषु बालस्य मूत्रेण आद्रीभूताऽपि विष्टरे स्वयं स्वपिति, परन्तु बालं च शुष्कस्थाने शय्यायां स्वापयति। किमधिकं माता स्वसन्ततिसुखाय रक्षणाय च स्वदुर्लभप्राणानपि दातुम् उद्यता भवति। अतः सत्यमिदं कथितं यत् जननी स्वर्गादपि अधिकं सुखं प्रयच्छति।

भासस्य कथनानुसारेण 'माता किल मनुष्याणां देवतानाम् च दैवतम्'।

वस्तुतः जन्मभूमिः जननीवत् अस्मान् सर्वान् नानाविधानि अन्नानि, फलानि च दत्त्वा यावज्जीवनं पालयति पोषयति संवर्धयति च। भूमिः अस्मभ्यं धनं, धातून्, रत्नानि च प्रयच्छति। जन्मदात्री कतिचिद्वर्षानन्तरं स्वकर्त्तव्यं पूरयित्त्वा निवृत्ता भवति; किन्तु जन्मभूमिः अस्माकं जीवनस्य अन्तिमं क्षणं यावत् स्वान्नजलफलादिभिः अस्मान् पोषयति। वयं च अन्तिमं श्वासम् अत्रैव नयामः। पशुपक्षिषु अपि स्वमातृभूमिं प्रति स्नेहभावः दृश्यते। मानवः तु विशेषरूपेण विवेकशीलः मनस्वी च वर्तते। अतः मातृभूम्यै तस्य स्नेहः स्वाभाविकः। सुष्ठूक्तम् अथर्ववेदेऽपि "माता भूमिः पुत्रोऽहम् पृथिव्याः"।

प्रश्नाः -

1. जन्मभूमिः अस्मान् जननीवत् कथं संवर्धयति ?

2. अथर्ववेदे किम् उक्तम् ?

3. स्वर्गाद् अपि श्रेष्ठा वरिष्ठा च के वर्तेते ?

4. भासस्य कथनं किम् ?

5. भूमिः अस्मभ्यं किं किं प्रयच्छति ?

6. मानवः विशेषरूपेण कीदृशः वर्तते ?

प्रश्न 21. प्राचार्यस्य कृते अवकाशार्थम् एकं प्रार्थनापत्रं लिखत | **4**

अथवा

शुल्कमुक्त्यर्थम् आवेदन पत्रं लिखत |

प्रश्न 22. प्रदत्तैः शब्दैः अनुच्छेद लेखनं कुरुत - **4**

(मा,भव,प्रमदितव्यम् ,भूत्यै,न,प्रमदः,प्रवचनाभ्यां ,अतिथिदेवो)

स्वाध्यायान्मा .....। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं ..... व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न .....। कुशलान्न प्रमदितव्यम्। ..... न प्रमदितव्यम्। स्वाध्याय- ..... न प्रमदितव्यम्। देवपितृकार्याभ्यां ..... प्रमदितव्यम्। मातृदेवो ..... । पितृदेवो भव। आचार्यदेवो भव। ..... भव ।

अथवा

(तत्र,अलूक्षा,कर्माणि,अथ,इतराणि,सम्मर्शिनः,सुचरितानि,ते)

यान्यनवद्यानि..... , तानि सेवितव्यानि, नो..... । यान्यस्माकं ..... तानि, त्वयोपास्यानि, नो इतराणि ..... यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्, ये तत्र ब्राह्मणाः..... , युक्ता आयुक्ताः, ... धर्मकामाः स्युः, यथा ..... तत्र वर्तेरन् तथा ..... वर्तेथाः।

प्रश्न - 23. अधोलिखितेषु एकस्य कवेः संक्षिप्तपरिचयं लिखत - **4**

(अ) महर्षि: वेदव्यासः

(ब) आदिकवि: वाल्मीकिः

(स) महाकविः भासः

(द) महाकविः कालिदासः

---XXX---